(यथा, रघुः । ७ । ५६ ।
"रथी निषङ्गी कवची धनुष्मान्
दृप्तः स राजन्यकमेकवीरः ॥")

धनूः, स्त्री, (धन धान्ये शब्दे वा + "कृषिचमितनि-धनीति ।" उणां १ । ८२ । इति ऊः ।) धनुः । इति जटाधरः ॥ धान्यसञ्चये धनुषि च पुं । इति संक्षिप्तसारोणादिवृत्तिः ॥

धनेयकं, क्ली, धन्याकम् । इत्यमरटीकायां भरतः ॥

धनेश्वरः, पुं, (धनानामीश्वरः ।) कुवेरः । इति हेमचन्द्रः । २ । १०४ ॥ (यथा, महाभारते । १ । २२८ । ३२ ।
"जगृहुः सर्व्वशस्त्राणि स्वानि स्वानि सुरास्तथा ।
कालदण्डं यमो राजन् ! गदाञ्चैव धनेश्वरः ॥"
विष्णुः । यथा, तत्रैव । १३ । १४९ । ६३ ।
"वत्सरो वत्सलो वत्सी रत्नगर्भो धनेश्वरः ॥"
मुग्धबोधप्रणेतुर्वोपदेवस्य गुरुः । यदुक्तम् ।
"विद्वद्धनेश्वरच्छात्रो भिषक्केशवनन्दनः ।
वोपदेवश्चकारेदं विप्रो वेदपदास्पदम् ॥")

धन्यः, पुं, (धनाय हितः । धन + यत् ।) अश्वकर्ण-वृक्षः । इति राजनिर्घण्टः ॥

धन्यः, त्रि, (धनाय हितः । धन + यत् ।) पुण्य-वान् । सुकृती । इत्यमरः । ३ । १ । ३ ॥
"स्वनामा पुरुषो धन्यः पितृनामा च मध्यमः ।
अधमो भ्रातृनामा च मातृनामाधमाधमः ॥"
इति गोपीचन्द्रधृतपद्यम् ॥
धन्यत्वकथनं यथा,—
सनत्कुमार उवाच ।
"विस्तीर्णवालुकामध्ये कच्छपः शतयोजनः ।
भीतश्च कम्पितस्तत्र दृष्टो दुःखी च शुष्कितः ॥
निःसारितो राघवेण मीनेन च महात्मना ।
धन्योऽसीति मयोक्तश्च नाहं धन्य उवाच सः ॥
क्षीरोदसागरो धन्यो जन्तवो यत्र मद्विधाः ।
भवान् धन्योऽसि क्षीरोद ! तेनोक्तो नाहमेव च ॥
धन्या वसुन्धरा देवी यत्रैव सप्त सागराः ।
धन्यासि वसुधेत्युक्ता नाहमेवेत्युवाच सा ॥
धन्योऽनन्तो समाधारः कृष्णांशो नागराड्विभुः ।
धन्योऽसीत्युक्तः परमो धन्यो नाहमुवाच सः ॥
धन्यश्च भगवान् ब्रह्मा विधाता जगतामपि ।
धन्योऽसि तत्र धाता च धन्यो नाहमुवाच सः ॥
धन्यो महेश्वरो देवो योगीन्द्राणां गुरोर्गुरुः ।
धन्योऽसीत्युक्तः शम्भुश्च धन्यो नाहमुवाच सः ॥
धन्यो गणेश्वरो देवो देवानां प्रवरः परः ।
देवेषु धन्यो मान्योऽसीत्युक्तो गणपतिर्मया ॥
नाहं धन्यो मुनिश्रेष्ठ ! सस्मितश्चेत्युवाच सः ।
धन्या वेदाश्च चत्वारः कर्म्माणि यद्व्यवस्थया ॥
तस्माद्धन्याश्च ते वेदा गच्छ तत्र मनीषिणः ।
यूयं धन्याश्च मान्याश्चेत्युक्ता वेदा मया ततः ॥
ऊचुस्ते न वयं धन्या यज्ञसंघश्च साम्प्रतम् ।
वयं अवस्थाकर्त्तारो यज्ञौघः फलदः स्वयम् ।
तस्माद्धन्यः स एवापि गच्छ गच्छ महामुने ! ॥
धन्योऽसि यज्ञसंघोऽसीत्युक्तस्तत्र मया विभो ! ।
ऊचुर्यज्ञा न वयं धन्या धन्यं कर्म्म शुभं मुने ! ॥
शुभकर्म्मासि धन्यं त्वं नाहं धन्यमुवाच तत् ।
श्रीकृष्णः परमात्मा च धन्यो मान्यश्च निश्चितम् ॥
धन्योऽसीति मयोक्तश्च दक्षिणाभिः सहेति च ।
इत्युक्तो भगवताप्यत्र कथितं सर्व्वकारणम् ॥"
इति ब्रह्मवैवर्त्ते श्रीकृष्णजन्मखण्डे ८७ अः ॥
(धनं लब्धा । धन + "धनगणं लब्धा ।" ४ । ४ । ८४ । इति यत् । धनलब्धा ॥ पुं, धनस्य निमित्तं संयोगो उत्पातो वा । "गोद्व्यचोऽसंख्यापरि-माणाश्वादेर्यत् ।" ५ । १ । ३९ । इति यत् ॥)

धन्यव्रतं, क्ली, (धन्यं धनजनकं व्रतम् ।) धन-जनकव्रतविशेषः । कुवेरः पूर्व्वं शूद्र आसीत् एतद्व्रतं कृत्वा धनपतिरभूत् । इति वराह-पुराणम् ॥

धन्या, स्त्री, (धन्य + टाप् ।) आमलकी । इति मेदिनी । ये, ३३ ॥ धन्याकम् । इति हेमचन्द्रः । ३ । ८३ ॥ मनोः कन्या । इयमेव ध्रुवस्य पत्नी । यथा, मत्स्यपुराणे । ४ । ३८ ।
"धन्या नाम मनोः कन्या ध्रुवाच्छिष्टमजीजनत् ॥")

धन्याकं, क्ली, (धन्यते भक्षार्थिभिरिति । धन + "पिनाकादयश्च ।" उणां ४।१५। इत्याकप्रत्ययेन निपातनात् साधुः ।) धनिया इति ख्यातं शस्यम् । तत्पर्य्यायः । छत्रा २ वितुन्नकम् ३ कुस्तुम्बुरु ४ । इत्यमरः । २ । ९ । ३८ ॥ धान्यकम् ५ धन्यम् ५ धनिकम् ७ धनीयकम् ८ कुस्तुम्बुरी ९ धान्याकम् १० तुम्बुरु ११ धन्या १२ तुम्बुरी १३ धनेयकम् १४ । इति भरतधृतकोषान्तरम् ॥ धानकम् १५ धान्यम् १६ धानेयम् १७ धनिका १८ छत्राधान्यम् १९ सुगन्धि २० शाकयोग्यम् २१ सूक्ष्मपत्रम् २२ जनप्रियम् २३ धान्यबीजम् २४ बीजधान्यम् २५ वेधकम् २६ । इति राज-निर्घण्टः ॥ कुलटी २७ धेनिका २८ धन्यकम् २९ धाना ३० धानेयकम् ३१ । इति भावप्रकाशः ॥ अस्य गुणाः । मधुरत्वम् । शीतत्वम् । कषा-यत्वम् । पित्तज्वरकासतृषाच्छर्दिकफनाशित्वम् । दीपनत्वञ्च । इति राजनिर्घण्टः ॥ स्निग्धत्वम् । वृष्यत्वम् । मूत्रलत्वम् । लघुत्वम् । तिक्तत्वम् । कटुत्वम् । वीर्य्यकारित्वम् । पाचनत्वम् । रोच-नत्वम् । ग्राहित्वम् । स्वादुपाकित्वम् । त्रिदोष-दाहश्वासामार्शःकृमिनाशित्वञ्च ॥
"आर्द्रन्तु तद्गुणं स्वादु विशेषात् पित्तनाशनम् ॥"
इति भावप्रकाशः ॥
"शिलायां साधु संपिष्टं धान्यकं वस्त्रगालितम् ।
शर्करोदकसंमिश्रं कर्पूरादिसुसंस्कृतम् ॥
नवीने मृण्मये पात्रे स्थितं पित्तहरं परम् ॥"
राजनिर्घण्टः ॥

धन्व, [न्] क्ली, (धन्वति गम्यते दुर्गमादिस्थले-ऽनेनेति । धन्व गतौ सौत्रो धातुः + कनिन् ।) धनुः । (धन्वति गम्यतेऽत्र इति ।) स्थलम् । इति मेदिनी । ने, ७८ ॥ (यथा,—
"चरोऽनूपजलाकाशधन्वाद्यो भक्ष्यसंविधिः ।
जलजानूपजाश्चैव जलानूपचराश्च ये ॥
गुरुभक्ष्याश्च ये सत्त्वाः सर्व्वे ते गुरवः स्मृताः ।
लघुभक्ष्यास्तु लघवो धन्वजा धन्वचारिणः ॥"
इति चरके सूत्रस्थाने २७ अः ॥)

धन्वं, क्ली, (धनतीति । धन शब्दे + "उक्षादयश्च ।" उणां ४ । ९५ । इति वनप्रत्ययेन निपातनात् साधुः ।) धनुः । इत्यमरटीकायां भरतः ॥ (यथा, महाभारते । ७ । २०० । ४३ ।
"धनुर्धराय देवाय प्रियधन्वाय धन्विने ।
धन्वन्तराय धनुषे धन्वाचार्य्याय ते नमः ॥")

धन्वङ्गः, पुं, (धनोर्धनुष इव अङ्गं यस्य ।) धन्वन-वृक्षः । इति भावप्रकाशः ॥ धामिनी इति हिन्दी भाषा । तत्पर्य्यायगुणाः ।
"धन्वङ्गस्तु धनुर्वृक्षो गोत्रवृक्षः सुतेजनः ।
धन्वङ्गः कफपित्तास्रकासहृत्तुवरो लघुः ।
वृंहणो बलकृद्रूक्षसन्धिकृद्व्रणरोपणः ॥"
इति भावप्रकाशः ॥
पुस्तकान्तरे धन्वगोऽपि पाठः ॥

धन्वदुर्गं, क्ली, (धन्वना निर्जलस्थलेन वेष्टितं दुर्गम् ।) चतुर्द्दिशं मरुवेष्टितपञ्चयोजनपरि-मितमनुदकस्थलम् । निर्जलदेशः । इति महा-भारते राजधर्म्मः ॥ (यथा, मनुः । ७ । ७० ।
"धन्वदुर्गं महीदुर्गमब्दुर्गं वार्क्षमेव वा ।
नृदुर्गं गिरिदुर्गं वा समाश्रित्य वसेत् पुरम् ॥")

धन्वनः, पुं, (धन्वति दृढ़त्वं गच्छतीति । धन्व गतौ सौत्रधातुः + ल्युः ।) वृक्षविशेषः । इति रत्न-माला ॥ धामनि इति भाषा । (यथा, रामा-यणे । २ । ९४ । ९ ।
"वदर्य्यामलकैर्नीपैर्वेत्रधन्वनबीजकैः ॥")
तत्पर्य्यायः । रक्तकुसुमः २ धनुर्वृक्षः ३ महा-बलः ४ रुजासहः ५ पिच्छिलकः ६ रूक्षस्वादु-फलः ७ । अस्य गुणाः । कटुत्वम् । उष्णत्वम् । कषायत्वम् । कफनाशित्वम् । दाहशोषकरत्वम् । ग्राहित्वम् । कण्ठामयशमनत्वञ्च । इति राज-निर्घण्टः ॥ (फले, क्ली । यथा, महाभारते । ३ । ११९ । १३ ।
"करूषकाणीङ्गुदधन्वनानि
पिप्पलानां कामकारं कुरुष्व ॥")

धन्वन्तरिः, पुं, (धनुरुपलक्षणत्वात् शल्यादि-चिकित्साशास्त्रं तस्य अन्तं ऋच्छतीति । ऋ गतौ + "अच इः ।" उणां ४ । १३८ । इति इः ।) देववैद्यः । स भगवदवतारः । यथा,—
"धन्वन्तरिश्च भगवान् स्वयमेव कीर्त्ति-
र्नाम्ना नृणां पुरुरुजां रुज आशु हन्ति ।
यज्ञे च भागममृतायुरवावरुन्ध
आयुष्यवेदमनुशास्त्यवतीर्य्य लोके ॥
स वै भगवतः साक्षात् विष्णोरंशांशसम्भवः ।
धन्वन्तरिरिति ख्यात आयुर्व्वेददृगिज्यभाक् ॥"
इति श्रीभागवतम् ॥ * ॥
"नारायणांशो भगवान् स्वयं धन्वन्तरिर्महान् ।
पुरा समुद्रमथने समुत्तस्थौ महोदधेः ॥
सर्व्ववेदेषु निष्णातो मन्त्रतन्त्रविशारदः ।
शिष्यो हि वैनतेयस्य शङ्करस्योपशिष्यकः ॥"
इति ब्रह्मवैवर्त्ते श्रीकृष्णजन्मखण्डे ५१ अध्यायः ॥